No. २४०१ / क

Title सर्वतोभद्रमण्डल निर्माणप्रकारः

Author

Extent २पत्र Age

Subject तन्त्र

सर्वतोभद्रमंडलनिर्माणप्रकार

नं॰ १८०९

सं. ~~२६६१~~

२६६१

शारदातिलकोक्तः सर्वतोभद्रमण्डल

निर्माणप्रकारः पं. २



श्रीश्रीदुर्गा

ॐ १

अथ सर्वतोभद्रं ॥ शारदायां चतुरस्रे चतुःकोष्ठे क
र्णसूत्रसमन्विते चतुर्ष्वपि च कोष्ठेषु कोणसूत्रचतु
ष्टयं मध्ये मध्ये यथा मत्स्या भवेयुः पातयेत्तथा
पूर्वापरायते द्वे द्वे मंत्री याम्योत्तरायते पातायत्तेषु
मत्स्येषु समं सूत्रचतुष्टयं पूर्ववत्कोणकोष्ठेषु
कर्णसूत्राणि पातयेत् तत्रपूतेषु मत्स्येषु दद्यात्सू
त्रचतुष्टयं ततः कोष्ठेषु मत्स्याः स्युस्तेषु सूत्राणि पा
तयेत् षट्त्रिंशता पदैर्मध्ये लिखेत्पद्मं सुलक्षणं
वहिः पंक्त्या भवेत्पीठं पंक्तियुग्मेन वीथिका द्वारशो
भोपशोभाभ्यां शिष्टाभ्यां परिकल्पयेत् शास्त्रोक्तवि
धिना मंत्री ततः पद्मं समालिखेत् पद्मक्षेत्रस्य संत्यज्य
द्वादशांशं वहिः सुधीः तन्मध्ये विभजेद्वृत्तैस्त्रिभिः स
मविभागतः आद्यं स्यात्कर्णिकास्थानं केशराणां
द्वितीयकं तृतीयं पद्मपत्राणां सुक्तांशेन दलाग्रकं
वाह्यवृत्तान्तरालस्य मानेन विधिना सुधीः आलिखे
दाल्पहस्तेन दलाग्राणि समन्ततः दलमूलेषु युगशः
केशराणि प्रकल्पयेत् पतत्साधारणं प्रोक्तं पंकजं
तत्र वेदिभिः पदानि त्रीणि पादार्थं पीठकोणेषु मार्जये
त् अवशिष्टैः पदैर्द्विद्वान् पीठगात्राणि कल्पयेत् प
दानि वीथिसंस्थानि मार्जयेत्पंक्त्याभेदतः दिक्षु द्वा
राणि रचयेद्द्विचतुःकोष्ठकैस्ततः पदैस्त्रिभिरथैकेन
शोभाः स्युर्द्वारपार्श्वयोः उपशोभाः स्युरेकेन त्रिभिः को
ष्ठैरनन्तरं अवशिष्टैः पदैः षड्भिः कोणानां स्याच्चतु
ष्टयं रंजयेत्पंचभिर्वर्णैर्मण्डलं तन्मनोहरं पीतं हरि

द्वाचूर्णंस्यात्सितेनमण्डलसम्भवं कुसुम्भचूर्णमरुणं
कृष्णंदग्धपुलाकलजं विल्वादिपत्रजंश्याममसितुक्तं
वर्णपंचकं ग्रंथलोत्सेधविस्ताराःसीमारेखाःसिताः
शुभाः कर्णिकांपीतवर्णेनकेशराण्यरुणेनच शु
[illegible]वर्णानिपत्राणितत्सन्धीन्श्यामलेनच रजसा
[illegible]न्तंत्रीयद्वापीतेनवकर्णिका केशराःपीतरक्ताः
[illegible]रुणानिदलानिच सन्धयःकृष्णवर्णाःस्युःसिते
[illegible]सितेनवा रंजयेत्पीठगर्भाणिपादाःस्युररुण
[illegible]भाः गात्राणितस्यशुक्लानिवीथिषुवचनरस्तु
शालिखेनकल्पलतिकादलपुष्पसमन्विताः उप
शोभाःपीतवर्णाःकोणान्यसितभानिच तिस्रोरेखा
वहिःकार्य्याःसितारक्तासिताःक्रमात् मण्डलसर्व
तोभद्रमेतत्साधारणंमतं ॥

ॐ· २ अथ स्वल्पसर्वतोभद्रमण्डलं । चतुरस्रांभुवंभि
त्वा दिग्भ्यो द्वादशधा सुधीः पातयेत्तत्र सूत्राणि
कोष्ठानां दृश्यते शतं चतुश्चत्वारिंशदाढ्यं पश्चात्
षट्त्रिंशताम्बुजं कोष्ठैः प्रकल्पयेत् पीठं पंक्त्या
2 नैवात्र वीथिका द्वारशोभे यथा पूर्वमुपशोभान
दृश्यते अवशिष्टैः पदैः कुर्यात् षड्भिः कोणानि
तंत्रवित् विदध्यात् पूर्ववच्छेषं पंचवा मण्डलस्य
ते ॥